पालयतीति। पालि + ण्वुल्।) बालकपालके, त्रि।

शिशुपालहा. [न्] पुं, (शिशुपालं हतवानिति। हन् + क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः॥

शिशुभावः, पुं, (शिशोर्भावः।) शिशुत्वम्। तान्त्रिकभावविशेषः। यथा,—
"उक्तानुक्तञ्च यत्किञ्चित् क्रियते सर्व्वदा प्रिये।
शिशुभाव इति ख्यातः सर्व्वतन्त्रेषु गोपितः॥"
इति तन्त्रम्॥

शिशुमारः,पुं,(शिशून् मारयतीति। मृ + णिच् + अण्।) जलजन्तुभेदः। शोँष इति शुशुक् इति च ख्यातः। इत्यमरभरती॥ (यथा, वाजसनेयसंहितायाम्। २४। ३०।
"नीलङ्गोः क्रमिः समुद्राय शिशुमारो हिमवते हस्ती॥" *॥) अस्य पर्य्यायः शिशुकशब्दे द्रष्टव्यः। अस्य गणना गुणाश्च पादिशब्दे द्रष्टव्याः॥ तारात्मकाच्युतः। इति मेदिनी॥ तद्विवरणं यथा,—
"शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति।
सन्निवेशञ्च तस्यापि शृणुष्व मुनिसत्तम॥
यदह्ना कुरुते पापं दृष्ट्वा तन्निशि मुच्यते।
तावत्यश्चैव तारास्ताः शिशुमाराश्रिता दिवि॥
तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि तु।
उत्तानपादस्तस्याथ विज्ञेयोऽप्युत्तरो हनुः॥
यज्ञोऽधरश्च विज्ञेयो धर्म्मो मूर्द्धानमाश्रितः।
हृदि नारायणश्चास्ते अश्विनौ पूर्व्वपादयोः॥
वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी।
शिश्नं संवत्सरस्तस्य मित्रोऽपानं समाश्रितः॥
पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः।
तारका शिशुमारस्य नास्तमेति चतुष्टयम्॥
इत्येष सन्निवेशोऽयं पृथिव्यां ज्योतिषां तथा।
द्वीपानामुदधीनाञ्च पर्व्वतानाञ्च कीर्त्तितः॥
वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै।
तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः॥
यदन्तु वैष्णवः कायस्ततो विप्र वसुन्धरा।
पद्माकारा समुद्भूता पर्व्वताब्ध्यादिसंयुता॥
ज्योतींषि विष्णुर्भुवनानि विष्णु-
र्वनानि विष्णुर्विदिशो दिशश्च।
नद्यः समुद्राश्च स एव सर्व्वं
यदस्ति यन्नास्ति च विप्रवर्य्य॥
ज्ञानस्वरूपो भगवान् यतोऽसा-
वशेषमूर्त्तिर्न तु वस्तुभूतः।
ततो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि॥
यदा हि शुद्धं निजरूपमव्व
कर्म्मक्षये ज्ञानमयास्तदोषम्।
तदा हि सङ्कल्पतरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः॥
महीघटत्वं घटतः कपालिका
कपालिकाचूर्णरजस्ततोऽप्यनुः।
जनैः स्वकर्म्मास्तिमितात्मनिश्चयै-
रालक्ष्यते ब्रूहि किमत्र वस्तु॥"
इति विष्णुपुराणे २ अंशे १२ अध्यायः॥*॥

अपि च। "केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः। तस्य लाङ्गूले प्रजापतिः अग्निरिन्द्रो धर्म्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः॥ तस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः। पुनर्व्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्व्वाषाढ़े दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलञ्च दक्षिणवामयोः कर्णयो मघादीन्यष्टनक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत। वङ्क्रिषु अस्थिषु। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वेषु प्रातिलोम्येन युञ्जीत। शतभिषा ज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्व्वाङ्गेषु रोमसु सर्व्वे तारागणाः। एतदु हैव भगवतो विष्णोः सर्व्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति।
ग्रहर्क्षतारामयमाधिदैविकं
पापापहं मन्त्रकृतां त्रिकालम्।
नमस्यतः स्मरतो वा त्रिकालं
नश्येत तत्कालजमाशु पापम्॥"
इति श्रीभागवते ५ स्कन्धे शिशुमारसंस्थानम् २३ अध्यायः॥

शिशुवाहकः,पुं, (शिशुं वहतीति। वह + ण्वुल्। वनच्छागलः। इति हेमचन्द्रः॥ बालकवोढरि, त्रि॥

शिशुवाह्यकः, पुं, (शिशुर्वाह्यो यस्य। ततः कन्। वनच्छागः। इति त्रिकाण्डशेषः॥

शिश्नः, पुं, (शश्नतीति। शश + बाहुलकात् नक्प्रत्ययेन साधुः।) मेढ्रः। इत्यमरः॥ (यथा, भागवते। २। ६। ८।
"पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः॥")
अस्य पर्य्यायः लिङ्गशब्दे द्रष्टव्यः॥

शिश्विदानः,त्रि, (श्वेतितुमिच्छतीति। श्वित + सन् + "श्वितेर्दश्च।"उणा० २।८३। इति आनच् सनो लुक् तकारस्य च दकारः। पापकर्म्मा। तत्पर्य्यायः। कृष्णकर्म्मा २। इत्यमरः॥ द्वे पापाचारे। शश्वन्निन्द्यतेऽसौ शिश्विदानो मनीषादिः द्वितालव्यः। कृष्णं पापाचारत्वात् मलिनं कर्म्मास्य कृष्णकर्म्मा। केचित्तु अकृष्णकर्म्मा इति पठन्ति। द्वे निष्पापे। श्विदि शौक्ल्ये इत्यस्य काने शिश्विदानः। अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य अकृष्णकर्म्मा शुक्लकर्म्मा इत्यर्थः। इति व्याचक्षते च। इति भरतः॥*॥
"शिश्विदानः कृष्णकर्म्मा शुक्लकर्मेति कस्यचित्॥"
इति जटाधरः॥
(यथा, प्रद्युम्नविजये। ७ अङ्के।
"खाङ्गिक! छिद्यतां छिद्यतां एष क्षुद्रः शिश्विदानः॥")

शिष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शेषति। इति दुर्गादासः॥

शिष, लृ ध औ विशेषे। इति कविकल्पद्रुमः॥ (रुधा०-पर०-सक०-अनिट्।) विशेष उपरञ्जनम्। लृ, अशिषत्। ध, विशिनष्टि स्मरं मूर्त्त्या यः। इति हलायुधः। मूर्त्तिविशिष्टं करोति इत्यर्थः। औ, शेष्टा। इति दुर्गादासः।

शिष, कि असर्व्वोपयोगे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे-भ्वा०-सक०-सेट्। असर्व्वोपयोगः परिशेषीकरणम्। कि, शेषयति शेषति यशोराशिं लोकः अवशिष्टं करोति इत्यर्थः। वेरतिशायने शिषकिरनुवर्त्तते। कि, विशेषयति विशेषति सम्पत्त्या भूपं विधिः। इति दुर्गादासः॥

शिष्टः, त्रि, (शास + क्तः। "शास इदङ्हलोः।" ६। ४। ३४। इति उपधाया इकारः। "शासिवसिघसीनाञ्च।"८। ३। ६० इति सस्य षः।) शान्तः। सुबुद्धिः। धीरः। तस्य लक्षणं यथा,—
"न पानिपादचपलो न नेत्रचपलो मुनिः।
न च वागङ्गचपल इति शिष्टस्य लक्षणम्॥"
इति महाभारते अश्वमेधपर्व्व॥
अपिच।
"धर्म्मो नाभिगतो यैस्तु वेदः सपरिबृंहणः।
ते शिष्टा ब्राह्मणाः प्रोक्ता नित्यमात्मगुणान्विताः॥"
इति कौर्म्मे उपविभागे २४ अध्यायः॥*॥
अन्यच्च।
"विशेषशब्दनिष्ठस्तु शेषः शिष्टः प्रचक्षते।
मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्म्मिकाः॥
मनुः सप्तर्षयश्चैव लोकसन्तानकारणात्।
तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते।
तैः शिष्टैः पालितधर्म्मः स्थाप्यते वै युगे युगे॥"
इति मात्स्ये १२० अध्यायः॥
(अवशिष्टः। यथा, गीतायाम्। ४। ३०।
"यज्ञशिष्टामृतभुजो यान्ति ब्रह्मसनातनम्॥"

शिष्टाचारः, पुं, (शिष्ट आचारः। शिष्टानामाचारो वा।) साधुव्यवहारः। यथा,—
"ततः स्मार्त्तः स्मृतो धर्म्मो वर्णाश्रमविभागशः।
एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते॥